Pli. 2

M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 629

Title: Nirukta-uttara
shatka

629

निरुक्त - उत्तर षट्कम् by यास्कमुनि
परिशिष्ट. BM

	Nirukta - Uttara Shatka -		: Title
परिशिष्ट.	Yāska.		: Author
			: Editor
	Daka 1656		: Year, Vols.
			: Publisher
629			: Remarks

इत्युत्तरषट्कस्य

नि॰ उ॰ श्रीगणेशाय नमः ॥ हरिः ओ३म् ॥ ॥ अथेमा अतिस्तुतय इत्याचक्षतेऽपि वा संप्रत्यय एव स्यान्महाभाग्याद्देवताया
१ सोऽग्निमेव प्रथममाह त्वमग्ने द्युभिस्त्वमाशुशुक्षणिरिति यथैतस्मिन्सूक्ते नाहत्वदृतेन्नाभिमष्व नेशाइति वरुणस्यास्या
थैषेंद्रस्य १ यद्द्याव इंद्र ते शतं सूक्तं यदि त इंद्र शतं दिवः शतं भूमयः प्रतिमानानि स्युर्न त्वा वज्रिन् सहस्रमपि
सूर्या न द्यावापृथिव्यावप्यश्नुवीतामित्यथैषादित्यस्य २ यदुदंचो वृषाकपे सूक्तं यदुदंचो वृषाकपे गृहमिं
द्राजगमत क्वस्य पुल्वघो मृगः क्व स बह्वादी मृगो मृगो मार्ष्टेर्गतिकर्मणः कमगद्देशं जनयोपनः सर्वस्माद्य इंद्र
उत्तरस्तमेतद्ब्रूम आदित्यमथैषादित्यरश्मीनां ३ विहि सोतोरसृक्षत सूक्तं व्यसृक्षत हि प्रसवायनवेंद्रं
देवममंसत यत्रामाद्यद्वृषाकपिरर्य ईश्वरः पुष्टेषु पोषेषु मत्सखा मम सखा मदनः सखायेनः सखायोऽस्तैः सहेति शिव
वा सर्वस्माद्य इंद्र उत्तरस्तमेतद्ब्रूम आदित्यमथैषाश्विनोः ४ सृण्येव जर्भरी तुर्फरी सूक्तं सृण्येवेति द्विविधा २

सृणिर्भवति भर्ता वा हंता वा तत्रथाश्विनौ वापि भर्तारौ जर्भरी भर्तारावित्यर्थस्तुर्फरी तू हंतारौ ॥ नैतोशेव तुर्फरी
पर्फरीका ॥ नितोशस्यापत्यं नैतोशं नैतोशेव तुर्फरी क्षिप्रहंतारौ ॥ उदन्यजेव जेमना मदेरू ॥ उदन्यजेवेत्युदक
जे इव रत्ने सामुद्रे चांद्रमसे वा जेमने जयमने जेमना मदेरू ॥ ता मे जराय्वजरं मरायु । एतज्जरायुजं शरीरं शरद
मजीर्णमथैषा सोमस्य ५ तरत्स मंदी धावति सूक्तं ॥ तरति स पापं सर्वं मंदी य स्तोति धावति गच्छत्यूर्ध्वां गतिं
॥ धारा सुतस्यांधसः ॥ धारया भिषुतस्य सोमस्य मंत्रपूतस्य वाचा स्तुतस्याथैषा यज्ञस्य ६ चत्वारि शृंगा त्र
यो अस्य पादा सूक्तं ॥ चत्वारि शृंगेति वेदा वा एत उक्ता बहुस्त्रेधा बद्धो मंत्रब्राह्मणकल्पैर्वृषभो रोरवीति रोरवण
मस्य सवनक्रमेण सामभिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसति यजुर्भिर्यजति सामभिः स्तुवंति महो देवरत्येष
हि महान्देवो यद्यज्ञो मर्त्यां आविवेशेत्येष हि मनुष्यान् आविशति यजमानायतस्योत्तरा भूयसे निर्वचनाय ७

चतुर्थी व्यावहारिकीति याज्ञिका ऋचो यजूंषि सामानि

नि॰ उ॰ ७ स्वर्यंतो नापेक्षंत आद्यां रोहंति रोदसी ॥ यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे ॥ स्वर्गं गच्छंत ईजाना वा नापेक्षंते ते अमुमेव
२ लोकं गतवंतमीक्षंत इति ॥ आद्यां रोहंति रोदसी ॥ यज्ञं ये विश्वतोधारं सर्वतोधारं सुविद्वांसो वितेनिरे इत्येषा वाचः
प्रवल्हितेव ८ चत्वारि वाक्परिमिता पदानि स्क० ॥ चत्वारि वाचः परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मेधा
विनो गुहायां त्रीणि निहितानि नार्थं वेदयंते गुहा गूढा ते तुरीयं त्वरतेः कतमानि तानि चत्वारि पदानि ओंकारो महाव्याहृ
तयश्चेत्यार्षं नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः मंत्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति नैरुक्ताः सर्पाणां
वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारिकीत्येके पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मप्रवादाः अथापि ब्राह्म
णं भवति सा वै वाक् सृष्टा चतुर्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयं या पृथिव्यां साग्नौ सा रथंतरे यांतरिक्षे सा शिव
वायौ सा वामदेव्ये या दिवि सादित्ये सा बृहति सा स्तनयित्नावथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्व २

दधुस्तस्माद्ब्राह्मणा उभयीं वाचं वदंति या च देवानां या च मनुष्याणामित्यथैषाक्षरस्य ९ ऋचो अक्षरे परमे व्योमन्यस्मि
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिनिषण्णाः सर्वे यस्तन्न वेद स ऋचा किं करिष्यति य इत्तद्विदुस्त इमे समासत इति
विदुष उपदिशति कतमत्तदक्षरमोमित्येषा वागिति शाकपूणिः ऋचश्च ह्यक्षरे परमे व्यवने धीयंते नानादेवतेषु
च मंत्रेष्वेतद्ध वा एतदक्षरं यत्सर्वां त्रयीं विद्यां प्रति प्रतीति च ब्राह्मणं १० आदित्य इति पुत्रः शाकपूणेरेषर्ग्भवति
यदेनमर्चंति प्रत्यृचः सर्वाणि भूतानि तस्य यदन्यन्मंत्रेभ्यस्तदक्षरं भवति रश्मयोऽत्र देवा उच्यंते य एतस्मिन्नधिनि
षण्णा इत्यधिदैवतमथाध्यात्मं शरीरमत्र ऋगुच्यते यदनेनार्चंति प्रत्यृचः सर्वाणींद्रियाणि तस्य यदविनाशि
धर्म तदक्षरं भवतींद्रियाण्यत्र देवा उच्यंते यान्यस्मिन्नात्मन्येकं भवंतीत्यात्मप्रवादाः ११ यदक्षरं न क्षरति न
क्षीयते वा क्षयं न भवति वाचोक्षय इति वा अक्षो यानस्यांजनात्तत्प्रकृतीतरद्वर्तनसामान्यादित्ययं मंत्रार्थश्चिंता

नि. उ. ३ भ्यूहोध्यूढोपिश्रुतितोपितर्कतो न तु पृथक्त्वेन मंत्रा निर्वक्तव्याः प्रकरणश एव तु निर्वक्तव्या न ह्येषु प्रत्यक्षमस्त्य
३ नृषेरतपसो वा पारोवर्यवित्सु तु खलु वेदितृषु भूयो विद्यः प्रशस्यो भवतीत्युक्तं पुरस्तान्मनुष्या वा ऋषिषूत्क्राम
त्सु देवानब्रुवन्को न ऋषिर्भविष्यतीति तेभ्य एतं तर्कमृषिं प्रायच्छन्मंत्रार्थचिंताभ्यूहमभ्यूढं तस्माद्यदेव किंचानू
चानोभ्यूहत्यार्षं तद्भवति १२ हृदा तष्टेषु मनसो जवेषु सक्त॥ हृदा तष्टेषु मनसां प्रजवेषु यद्ब्राह्मणाः संयजं
ते समानख्याना ऋत्विजो त्राहत्वं विजहुर्वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिरोह ब्रह्माण ऊह ब्रह्माण उ हैषां
ब्रह्मेति वा से यं विद्या श्रुतिमति बुद्धिस्तस्यास्तपसा पारमीप्सितव्यं तदिदमायुरिच्छता न निर्वक्तव्यं तस्माच्छंदस्सु शे
षा उपेक्षितव्या अथागमो यां यां देवतां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति १३ ॥ ॥
॥ ॥ इति त्रयोदशोध्यायः ॥ ॥ व्याख्यातं दैवतं यज्ञांगं चाथात ऊर्ध्वमार्गगतिं व्याख्यास्यामः सू शिदा ३

र्यं आत्मेत्युदितस्य हि कर्म दृष्टार्थे तदनुप्रवदंत्यथैतं महांतं महांतमात्मानमेषर्गणः प्रवदंतींद्रं मित्रं वरुणमग्निमा
हुरित्यथैषा महानात्मात्मजिज्ञासयात्मानं प्रोवाचाग्निरस्मि जन्मना जातवेदा अहमस्मि प्रथमजा इत्येताभ्यां १४
अग्निरस्मि जन्मना जातवेदा इत्यृक्॥ अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम यो मा ददाति स इदेवमा
वादहमन्नमन्नमदंतमद्मीति सहस्रात्वा प्रादुर्बभूवैवं तं व्याजहारायतमात्मानमभ्यात्मजमंतिकमन्यस्मा आचच
क्ष्वेति १५ अपश्यं गोपामनिपद्यमानं सक्त॥ आवरीवर्ति भुवनेष्वंतरित्यथैष महानात्मा सत्वलक्षणस्त
२ त्परं ब्रह्म तत्सत्यं तत्सलिलं तदव्यक्तं तदस्पर्शं तदरूपं तदरसं तदगंधं तदमृतं तच्छुक्रं तन्निष्ठो भूतात्मा सै
षा भूतप्रकृतिरित्येके तत्क्षेत्रं तज्ज्ञानात्क्षेत्रज्ञमनुप्राप्य निरात्मकमथैष महानात्मा त्रिविधो भवति स
त्वं रजस्तम इति सत्वं तु मध्ये विशुद्धं तिष्ठत्यभितो रजस्तमसी इति कामद्वेषलक्षणमित्याविहातस्य विशुध्यतो वि

नि॰ उ॰ ४ मूर्तिंकुर्वतःक्षेत्रज्ञःपृथक्त्वात्कायकल्पितेप्रतिभानोलिंगोमहानात्मातमोलिंगोविद्याप्रकाशालिंगस्तमोपिनिश्च
४ यलिंगआकाशः १६ आकाशगुणशब्दआकाशाद्वायुर्द्विगुणस्पर्शेनवायोर्ज्योतिस्त्रिगुणंरूपेणज्योतिष
आपश्चतुर्गुणारसेनाद्भ्यःपृथिवीपंचगुणागंधेनपृथिव्याभूतग्रामस्थावरजंगमास्तेदंतदहर्युगसहस्रंजागर्ति
तस्यांतेसुषुप्स्यन्नंगानिप्रत्याहरतिभूतग्रामाःपृथिवीमपियंतिपृथिव्यपआपोज्योतिषंज्योतिर्वायुंवायुराका
शमाकाशोमनोमनोविद्यांविद्यामहांतमात्मानंमहानात्माप्रतिभांप्रतिभाप्रकृतिंसास्वपितियुगसहस्रंरा
त्रिस्तावेतावहोरात्रावजस्रंपरिवर्त्ततेसकालस्तेदंतदहर्भवतियुगसहस्रपर्यंतमहर्यद्ब्रह्मणोविदुरात्रिंयुगस
हस्रांतांतेहोरात्रविदोजनाइति १७ तंपरिवर्त्तमानमन्योन्यप्रवर्त्ततेसृष्टाःसृष्टाविभूतातिमात्रोहमितिग
म्यतेमभिध्यादर्शनंदंपवर्कंमहाभूतेषुविरोधआकाशाद्वायोःप्राणाश्चक्षुश्चक्षुरस्तेजसोद्भ्यस्तेहंपृथिव्या शिव ४

पंचा चं

मूर्तिःपार्थिवास्त्वष्टौगुणाश्चिद्यास्त्रिन्मातृतस्त्रीपितृतोस्थिस्नायुमज्जानःपितृतस्त्वङ्मांसशोणितानिमातृतो
नपानीमत्यष्टौसोयंपुरुषःसर्वमयःसर्वज्ञानोपिक्लृप्तः १८ सयद्यनुरुध्यतेतद्भवतियदिधर्मानिरुध्यतेतद्देवोभवति
यदिज्ञानमनुरुध्यतेतदमृतोभवतियदिकाममनुरुध्यतेसंच्यवतइमांयोनिंसंदध्याज्जाइदमन्नमन्तश्लेष्मारेतःसंभवति
श्लेष्मणोरसोरसाच्छोणितंशोणितान्मांसंमांसान्मेदोमेदसःस्नावास्नाव्नोस्थीन्यस्थिभ्योमज्जामज्जातोरेतस्तदिदंयो
नौरेतःसिक्तंपुरुषःसंभवतिशुक्रातिरेकेपुमान्भवतिशोणितातिरेकेस्त्रीभवतिद्वाभ्यांसमेननपुंसकोभवतिशुक्राभि
न्नेनयमोभवतिशुक्रशोणितसंयोगान्मातृपितृसंयोगाच्चतत्कथमिदंशरीरंपरंसंभ्यन्तेसौम्योभवत्येकरात्रोषितंकल
लंभवतिपंचरात्राद्बुद्बुदःसप्तरात्रात्पेशीद्विःसप्तरात्रादर्बुदःपंचविंशतिरात्रस्वस्थितोघनोभवतिमासमात्रात्कठिनोभ
वतिद्विमासाभ्यंतरेशिरःसंपद्यतेमासत्रयेणग्रीवाव्यादेशोमासचतुष्केणत्वग्व्यादेशःपंचमेमासेनखरोमव्यादेशःष

नि॰ उ॰ ४
५

षष्ठेमुखनासिकाक्षिश्रोत्रंचसंभवतिसप्तमेचलनसमर्थोभवत्यष्टमेबुध्याध्यवस्यतिनवमेसर्वांगसंपूर्णोभवतिमृत
श्चाहंपुनर्जातोजातश्चाहंपुनर्मृतः॥नानायोनिसहस्राणिमयोषितानियानिवै॥आहाराविविधाभुक्ताःपीतानाना
नाविधाःस्तनाः॥मातरोविविधादृष्टाःपितरःसुहृदस्तथा॥अवाङ्मुखःपीड्यमानोजंतुश्चैवसमन्वितः॥सांख्यंयो
गंसमभ्यस्येत्पुरुषंवापंचविंशकमितिततश्चदशमेमासेप्रजायतेजातश्चवायुनास्पृष्टस्तन्नस्मरतिजन्ममरणमंतेच
शुभाशुभंकर्मैतच्छरीरस्यप्रामाण्यं १९ अष्टोत्तरंसंधिशतमष्टकपालंशिरःपद्यतेषोडशवपापलानिनवस्ना
युशतानिसप्तशतंपुरुषस्यमर्मणामर्धचतस्रोरोमाणिकोट्योहृदयंह्यष्टकपालानिद्वादशकपालाजिह्वावृषणौह्य
ष्टसुपर्णौतथोपस्थगुदपायवेतन्मूत्रपुरीषंकस्मादाहारपानसिक्तत्वादनुपचितकर्मणान्योन्यंजायेतेइतिनि
कर्मणासमवायेनेपूर्वप्रज्ञासमहत्यज्ञानतमसिमग्नोजरामरणक्षुत्पिपासाशोकक्रोधलोभमोहमदभयम शिव ५

त्सरहर्षविषादेर्ष्यासूयात्मकैर्द्वंद्वैरभिभूयमानःसोस्मादार्जवंजवीभावान्नविनिर्मुच्यतेसोस्मात्पाप्मनोमहाभूमिकावच्छरीरा
न्निर्विषमात्रःप्रक्रम्यप्रकृतिरधिष्ठितातैजसंशरीरंकृत्वाकर्मणोनुरूपंफलमनुभूयतस्यसंक्षयेपुनरिमंलोकंप्रतिपद्यते २०
अथयेहिंसामाश्रित्यविद्यामुत्सृज्यमहत्तपस्तेपिरेचिरेणवेदोक्तानिवाकर्माणिकुर्वंतितेधूममभिसंभवंतिधूमाद्रात्रिं
रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्दक्षिणायनंदक्षिणायनात्पितृलोकंपितृलोकाच्चंद्रमसंचंद्रमसोवायुंवायोर्वृष्टिं
वृष्टेरोषधयश्चैतद्भूत्वातस्यसंक्षयेपुनरेवेमंलोकंप्रतिपद्यते २१ अथयेहिंसामुत्सृज्यविद्यामाश्रित्यमहत्तपस्तेपिरेज्ञानो
क्तानिवाकर्माणिकुर्वंतितेर्चिरभिसंभवन्त्यर्चिषोहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षादुदगयनमुदगयनाद्देवलोकंदेव
लोकादादित्यमादित्याद्वैद्युतंवैद्युतान्मानसंमानसःपुरुषोभूत्वाब्रह्मलोकमभिसंभवंतितेनपुनरावर्तंतेशिष्टादंदशूका
यतइदंनजानंतितस्मादिदंवेदितव्यमथाप्याह २२ नतंविदाथयइमाजजानान्यद्॥नतंविद्यथाविदुषोयमेवंविद्वांसो

नि॰ उ॰ १४ वदंत्यक्षरब्रह्मणस्पतिमन्यध्रुष्माकमंतरमन्यदेषामंतरंबभूवेतिनीहारेणप्रावृताजमसाजल्प्याचासुतृपउक्थशासः
६ प्राणांस्तर्पयंत्यध्यगाभिन[illegible]श्चरंत्यविद्वांसःक्षेत्रज्ञमनुप्रवदंत्यथाहोविद्वांसःक्षेत्रज्ञोनुकल्पतेतस्यतपसासहप्रमादमे
त्यथाप्तव्योभवतितेनामंततमिच्छेत्तेनसख्यमिच्छेदेषाहिसखाश्रेष्ठःसंजानातिभूतंभवद्भविष्यदितिदिक्‌तताकस्माज्जायतेतेस
स्व्य॰ खाकस्मात्स[illegible]तेसहभूतेंद्रियैःशेरतेमहाभूतानिसेंद्रियाणिप्रज्ञयाकर्मकारयतीतितस्ययदापःप्रतिष्ठाशीलमुपशमआ
म्हा॰ [illegible]ब्रह्मेतिसब्रह्मभूतोभवतिसाक्षिमात्रोव्यवतिष्ठतेवंधीज्ञानकृतोथात्मनोमहतःप्रथमंभूतनामधेयान्यनुक्रमिष्यामः
२३ हंसः। घर्मः। यज्ञः। वेनः। मेघः। कृमिः। विभुःप्रभुः। शंभुः। राभुः। वधकर्मा। सोमः। भूतं। भुवनं। भविष्यत्। आपः। महत्।
व्योम। यशः। महः। स्वर्णरं। स्मृतीकं। सतीकं। सतीनं। गहनं। गभीरं। गह्वरं। कं। अन्नं। हविः। सद्म। सदनं। ऋतं। योनिः। सतस्य
योनिः। सत्यं। नीरं। हविः। रयिः। सत्। पूर्णं। सर्वं। अक्षितं। नाम। सर्पिः। अपः। पवित्रं। अमृतं। इंदुः। हेम। स्वः। सर्गाः। शंबरं। वि शिव ६
स्मूर्णिकं। बर्हिः।

छा २

यत्र। व्योम। बर्हिः। धन्व। अंतरिक्षं। आकाशं। आपः। पृथिवी। भूः। स्वयंभूः। अध्वा। पुष्करं। सगरः। समुद्रः। तपः। तेजः।
सिंधुः। अर्णवः। नाभिः। वृक्षः। ऊर्ध्वः। तत्। यत्। किं। ब्रह्म। वरेण्यं। हंसः। आत्मा। भवति। वधंत्य। [illegible]नं। यद्वा। हिष्व। शरीराणि।
अव्यं वसं[illegible]कुरुते। यज्ञः। आत्मा। भवति। यदेनंतन्वतेथैतंमहांतमात्मानमेतानिसूक्तान्येतत्संचोतुप्रवदंति २४ सोमः
पवतेजनितामतीनांसक्व॥ सोमःपवतेसोमःसूर्यःप्रसवनाज्जनितामतीनांप्रकाशकर्मणामादित्यरश्मीनांदिवोद्योत
नकर्मणामादित्यरश्मीनांपृथिव्याःप्रथनकर्मणामादित्यरश्मीनामग्नेर्गतिकर्मणामादित्यरश्मीनांसूर्यस्यस्वीकर
णकर्मणाम्ना॰ नामिंद्रस्यैश्वर्यकर्मणाम्ना॰ नोविष्णोर्व्याप्तिकर्मणाम्ना॰ नामित्यधिदैवतमथाध्यात्मंसोमआत्माप्येतस्मा
देवेंद्रियाणांजनितेत्यर्थः॥ अपिवासर्वाभिर्विभूतिभिर्विभूततआत्मेत्यात्मगतिमाचष्टे २५ ब्रह्मादेवानांपदवीः
कवीनामृषिः॥ ब्रह्मादेवानामित्येषहिब्राह्मणाभवतिदेवानांदेवनकर्मणामादित्यरश्मीनांपदवीःकवीनामित्येषहिपदंवेत्ति

नि॰ उ॰ ४ कवीनां कवीयमानानामादित्यरश्मीनामृषिर्विप्राणामित्येषहि ऋषिणो भवति विप्राणां व्यापनकर्मणामादित्यरश्मीनां
७ महिषो मृगाणामित्येहि महान्भवति मृगाणां मार्गणकर्मणामा॰ नां श्येनो गृध्राणामिति श्येन आदित्यो भवति श्यायते र्गति
कर्मणो गृध्र आदित्यो भवति गृध्यतेः स्थानकर्मणो यत एतस्मिं स्तिष्ठति स्वधितिर्वनानामित्येषहि स्वयं कर्माण्यादित्यो धत्ते व
नानां वननकर्मणामा॰ नां सोमः पवित्रमत्येति रेभन्नित्येषहि पवित्रं रश्मीनां त्येति स्तूयमान एष एवैतत्सर्वमक्षरमित्य भि ४
धिदैवतमथाध्यात्मं ब्रह्मा देवानामित्ययमपि ब्रह्मा भवति देवानां देवनकर्मणामिंद्रियाणां पदवीः कवीनामित्ययमपि पदं
ना २ वेति कवीनां कवीयमानानामिंद्रियाणामृषिर्विप्राणामित्ययमपि ऋषिणो भवति विप्राणां व्यापनकर्मणामिंद्रियाणां
महिषो मृगाणामित्ययमपि महान्भवति मृगाणां मार्गणकर्मणामिंद्रियाणां श्येनो गृध्राणामिति श्येन आत्मा भव
ति श्यायते र्ज्ञानकर्मणो गृध्राणीन्द्रियाणि गृध्यतेः ज्ञानकर्मणो यदेतस्मिं स्तिष्ठति स्वधितिर्वनानामित्ययमपि स्व शिव ७

यं कर्माण्यात्मनि धत्ते वनानां वननकर्मणामिंद्रियाणां सोमः पवित्रमत्येति रेभन्नित्ययमपि इंद्रियाण्यत्येति स्तूय
मानो यमेवैतत्सर्वमनुभवत्यात्मगतिमाचष्टे २६ तिस्रो वाच ईरयति प्रवह्निः सेकः॥ वह्निरा॰ पवित्र॰ दित्यो भवति स तिस्रो
वाचः प्रेरयत्यृचो यजूंषि सामान्यस्यादित्यस्य कर्माणि ब्रह्मणो मतान्येष एवैतत्सर्वमक्षरमित्यधिदैवतमथाध्यात्मं वह्निरात्मा
भवति स तिस्रो वाच ईरयति प्रेरयति विद्यामतिबुद्धिमतामस्यात्मनः कर्माणि ब्रह्मणो मतान्ययमेवैतत्सर्वमनुभवत्यात्मग
तिमाचष्टे २७ सोमं गावो धेनवो वावशानाः ॥ एत एव सोमं गावो धेनवो रश्मयो वावश्यमानाः कामयमाना आदित्य
यंत्येवमेव सोमं विप्रा रश्मयो मतिभिः पृच्छमानाः कामयमाना आदित्यं यंत्येवमेव सोमः सुतः पूयते अज्यमान एत
मेवार्काः सर्वास्त्रिष्टुभः संनवंते तन्न एतस्मिन्नादित्य एकं भवंतीत्यधिदैवतमथाध्यात्ममेत एव सोमं गावो धेनव इंद्रिया
ण्येव वावश्यमानानि कामयमानान्यात्मानं यंत्येवमेव सोमं विप्रा इंद्रियाणि मतिभिः पृच्छमानानि कामयमानान्यात्मानं

नि·उ·१४ त्येवमेवसोमःसुतःपूयतेअज्यमानइममेवात्मानंचसप्तर्षयस्वसंनवंतेतान्येतस्मिन्नात्मन्नेकंभवंतीत्यात्मगतिमाचष्टे २८ अ
८ क्रान्तसमुद्रःप्रथमेविधर्मन्नित्यृक्॥ अत्यक्रमीत्समुद्र आदित्यःपरमेव्यवनेवर्षकर्मणाजनयन्प्रजाभुवनस्यराजासर्वस्यराजावृषापवि
त्रेअधिसानोअव्येबृहत्सोमोवावृधेसुवानइंदुरित्यधिदैवतमथाध्यात्ममत्यक्रमीत्समुद्रआत्मापरमेव्यवनेज्ञानकर्मणा
जनयन्प्रजाभुवनस्यराजासर्वस्यराजावृषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेसुवानइंदुरित्यात्मगतिमाचष्टे
२९ महत्तत्सोमोमहिषश्चकारेत्यृक्॥ महत्तत्सोमोमहिषश्चकारापांयद्गर्भोवृणीतदेवानामाधिपत्यमदधादिंद्रेपवमा
नओजोजनयत्सूर्येज्योतिरिंदुरित्यादित्यइंदुरात्मा ३० विधुंदद्राणंसमनेबहूनामित्यृक्॥ विधुंविधमनशीलंदद्राणंदमन
शीलंयुवानंचंद्रमसंपलितआदित्योगिरतिसद्योम्रियतेसदिवासमुदितेत्यधिदैवतमथाध्यात्मंविधुंविधमनशीलंदद्रा
णंदमनशीलंयुवानंमहांतंपलितआत्मागिरतिरात्रौम्रियतेरात्रिःसमुदितेत्यात्मगतिमाचष्टे ३१ साकंजानांसप्तथ शिव
८

माहुरेकजमित्यृक्॥ सहजातानांषण्णामृषीणामादित्यरश्मयस्तेषामिष्टानिवाकांतानिवाक्रांतानिवागतानिवागतानिवाम
तानिवानतानिवाद्भिःसहसंमोदंतेयत्रैतानिसप्तऋषीणानिज्योतींषितेभ्यःपरआदित्यस्तान्येतस्मिन्नेकंभवंतीत्यधिदैव
तमथाध्यात्मंसहजातानांषण्णामिंद्रियाणामात्मासप्तमस्तेषामिष्टानिवाकांतानिवाक्रांतानिवागतानिवामतानिवानता
निवान्नेनसहसंमोदंतेयत्रेमानिसप्तऋषीणानींद्रियाण्येभ्यःपरआत्मातान्येतस्मिन्नेकंभवंतीत्यात्मगतिमाचष्टे ३२ स्त्रि या ४
यःसतीस्ताउमेपुंसआहुरित्यृक्॥ स्त्रियएवैताःशब्दस्पर्शरूपरसगंधहारिण्यस्ताअमुंपुंशब्देननिराहारःप्राणइतिपश्यत्कः
ष्टान्नविजानात्यंधःकविर्यःपुत्रःसइमाजानातियःसइमाजानातिसपितुष्पितासदित्यात्मगतिमाचष्टे ३३ सप्तार्ध
गर्भाभुवनस्येरतसइत्यृक्॥ सप्तैतानादित्यरश्मीनयमादित्योगिरतिमध्यस्थानोर्ध्वशब्दोयतएतस्मिंस्तिष्ठंतितानिधीति
भिश्चमनसाचविपर्ययंतिसर्वाणिकर्माणिपरिभुवःपरिभवंतिसर्वाणिकर्माणिवर्षकर्मणेत्यधिदैवतमथाध्यात्मंस

नि॰उ॰१४ ह्येमानीन्द्रियाण्ययमात्मागिरातिमध्यस्थानोधर्षशब्दोयान्यस्मिन्प्रतिष्ठानितानिधीतिभिश्चमनसावविपर्यंतिपरिभुवःपरिभ
वंतिसर्वाणीन्द्रियाणिज्ञानकर्मणीत्यात्मगतिमाचष्टे ३४ नविजानामियदिवेदमस्मीत्युपरिष्टस्त्क॥ विजानान्बुद्धिमतःपुत्रःप
रिवदंयतेयमादित्योयमात्मा ३५ अपाङ्प्राङेतिस्वधयागृभीतोस्त्क॥ अपांचयतिप्रांचयतिनाहि स्वधयागृभीतोमर्त्यआ
दित्योमर्त्येनचंद्रमसासहेतौशश्वन्तामिनौविश्वगामिनौबहुगामिनौवान्यपश्यदित्यादित्यंचंद्रमसमित्यधिदैवत
मथाध्यात्ममपांचयतिप्रांचयतिस्वधयागृभीतोमर्त्यआमर्त्येनमनसासहतौशश्वन्तामिनौविश्वगामिनौबहुगा
मिनौवापश्यत्यात्मानंमनश्चेत्यात्मगतिमाचष्टे ३६ तदिदासभुवनेषुज्येष्ठंस्त्क॥ तद्भवतिभूतेषुभुवनेषुज्येष्ठमादि
त्यंयतोजज्ञउग्रस्त्वेषनृम्णोदीप्तनृम्णःसद्योजज्ञानोनिरिणातिशत्रूनितिरिणातिःप्रीतिकर्मादीप्तिकर्मावानुमदं
तियंविश्वऊमाइत्यधिदैवतमथाध्यात्मंतद्भवतिभूतेषुभुवनेषुज्येष्ठमव्यक्तंतपोजायतउग्रस्त्वेषनृम्णोज्ञाननृम्णःसद्यो शिव

जज्ञानोनिरिणातिशत्रूनितिरिणातिःप्रीतिकर्मादीप्तिकर्मावानुमदंतियंसर्वऊमाइत्यात्मगतिमाचष्टे ३७ कोअद्य
युंक्तेधुरिगास्सतस्यन्स्त्क॥ कआदित्योधुरिगायुंक्तेरश्मीन्कर्मवतोभानुमतोदुराधर्षानसून्यस्तुनवंतीषूनिषुणावंति
मयोभूनिसुखभूनियइमंसंभृतंवेदकथंसजीवतीत्यधिदैवतमथाध्यात्मंकआत्माधुरिगायुंक्तेइन्द्रियाणिकर्मवतोभा
नुमतोदुराधर्षानसून्यसुनवंतीषूनिषुणावंतिमयोभूनिसुखभूनियइमंसंभृतंवेदचिरंजीवतीत्यात्मगतिमाचष्टे ३८
कईषतेतुज्यतेकोबिभायस्त्क॥ कएवगच्छतिकोददातिकोबिभेतिकोमंसतेसंतमिंद्रंकस्तोकायापत्यायमहतेवनो
रणायरमणीयायदर्शनीयाय ३९ कोअग्निमीट्टेहविषाघृतेनस्त्क॥ कआदित्यंपूजयतिहविषाचघृतेनवस्तुवायज्ञाता
स्त्रुग्भिर्ध्रुवेभिरितिकस्मैदेवाआवहानाशुहोमार्थान्कोमंसतेवीतिहोत्रःसुदेवःकल्याणदेवइत्यधिदैवतमथाध्यात्मंकआ
त्मानंपूजयतिहविषाचघृतेनवस्तुवायज्ञातास्त्रुग्भिर्ध्रुवेभिरितिकस्मैदेवाआवहानाशुहोमार्थान्कोमंसतेवीतिहोत्रःसु

नि.उ.१४ प्रहृकल्याणाग्रज्ञइत्यात्मगतिमाचष्टे ४० त्वमंगप्रशंसिषोसक॥ त्वमंगप्रशंसीदेवःशविष्ठमर्त्यंनत्वदन्योऽस्तिमघवन्याताबापा
१० लयिताबाजेताबासुरवाधितावेदब्रवीमितेवचःरूमितिश्रुतं ४१ हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्।
सक॥ हंसइतिहंसाःसूर्यरश्मयःपरमात्मापरंज्योतिःपृथिवीव्याप्नोतिव्याप्तंसर्वंव्याप्तंवंदननकर्मणानभ्यासेनादित्यमंडलेनेति
त्ययंतीतिलोकोत्पयतीतिहंसयंत्ययतीतिहंसाःपरमहंसाःपरमात्मासूर्यरश्मिःप्रभूतगभीरवसतीतिवेभिर्वसतीतिवारश्मि
र्वसतीतिवावह्निर्वसतीतिवास्वर्णरेताःपूषागर्भोऽरिभंतीतिरिभंत्तावनकुटिलानिकुटंतारिभंतांतरिक्षानरत्यपांतरिक्षाच्च
रदीतिदिविभुर्विजमनंवासुभानुःफचभ्रतोहोनादित्यस्यगताभवत्यथितिथिर्दुरोणसत्सवेदुरोणासद्भवंसर्वेरसाविक
र्षयतिरश्मविकर्षयतिवह्निर्विकर्षयतिवननंभवत्यश्वगोजाअब्जगोजाधारिविगोजाःसर्वेगोजास्तजाबहुशब्दास्तदं
तिनिगमेनिगमव्याप्तिभवत्येषनिर्वचनाय ४२ द्वासुपर्णासयुजासखायेतिसक॥ द्वौद्वौप्रातिष्ठितौस्मकृतोधर्म शिव
१०

कत्तारोदुष्कृतंपापंपरिसारकमित्यावक्षतेसुपर्णासयुजासखायेत्यात्मानंदुरात्मानंपरमात्मानंप्रत्युत्तिष्ठतिशरीरएव
तज्जायतेवृक्षंरक्षशरीरंवृक्षंपक्षौप्रतिष्ठापयतितयोरन्युक्रत्वालमनश्नंनन्यंसन्यूपलासकौलिकत्तामभुत्तेयएवंवेद।
त्वमनश्ननन्योअभिचाकशीतीत्यात्मगतिमाचष्टे ४३ आयाहींद्रपथिभिरीडितेभिसक॥ आगमिष्यतिशक्रोदेव
तास्तिस्त्रिभिस्तीर्थैर्निःशक्रप्रतरेरीडितेभिस्त्रिभिस्तीर्थैर्भिर्यज्ञमिमंनोयज्ञभागमग्नीषोमभागौविंद्रोऽनुपश्चन्तः
प्राप्तेवंमातुलयोगःकन्याभागस्तहिकेवसायदेवतास्नातत्कालेनेशक्रंनिदर्शनं ४४ विप्रंविप्रासोवसेसक॥ विप्रोविप्रा
दुर्वे दांदं सोवसेविप्र[illegible]दत्तोवेदितव्यंविमलशरीरेणवापुनाविज्ञस्कहृत्स्वनिलयस्थितमकारसंहितमुकारपूरयेन्मकारेनिल
यंगत्तेविप्रप्राणिपुंविदुभिर्कविकासितंवह्नितेनःप्रभंकरनकपयेब्रह्मात्तशरीरममत्तजातस्थितमम्नवावामत्तमुरपे
वदंति॥ अग्निंगीर्भिर्हवामहे॥ अग्निंसंबोधयेदग्निःसर्वादेवताइतितस्योत्तराभ्यसेनिर्वचनाय ४५ जातवेदसेसु

मि॰

नि॰ उ॰ १४ नवामसोमम्नक्॥ जातवेदस इति जातवेदं सर्वस्वं चराचरं छिन्त्युत्सीति प्रलयन्यायेनाछायसुनवामसोममिति प्रसवेनाभि
१९ षवायसोमं राजानममृतमरातीयतो यज्ञार्थमिति स्मो निश्चयेन निदहाति दहति भस्मीकरोति सोमोददीदस्यर्षःसनः
पर्षदति दुर्गाणि दुर्गमनानि स्थानानि नावेव सिंधुं यथा कश्चित्कर्णधारो नावा सिंधुं स्यंदनान्नदीं जलदुर्गां महा भ
कूलां तारयति दुरितात्यग्निरिति दुरितानि धारयति तस्यैषापराभवति ४६ इदंतेन्याभिरसमानमद्भिर्याः काश्च सिंधुं
प्रवहंति नद्यः॥ सर्पो जीर्णामिव त्वचं जहाति पापं सशिरस्कोभ्युपेत्य॥ इदंतेन्याभिरसमानमद्भिर्याः काश्च सिंधुं प्रतिकला भा॰ ४
नद्यो वहंति सर्पो जीर्णामिव सर्पस्त्वचं त्यजति पापं त्यजं त्वा पआप्नोति स्नातासोमेषाभवति ४७ त्र्यंबकं यजामहे स्नक्॥
स्तं त्र्यंबको रुद्रं त्र्यंबकं यजामहे सुगंधिं सुबंधिं सुष्ठुगंधिं पुष्टिवर्धनं पुष्टिकारकमिवोर्वारुकमिव फलबंधनादारोध
नान्मृत्योः सकाशान्मुच्यस्व माकस्मादित्येषामितरेषापराभवति ४८ शतं जीव शरदो वर्धमानेति स्नक्॥ शिव १

गं

ना २

॥ शतं जीव शरदो वर्धमान इत्यपि निगमो भवति शतमिति शतं दीर्घमायुर्मरुत एना वर्धयंति शतमेनमेव शतात्मा
नं भवति शतमनंतं भवति शतमैश्वर्यं भवति शतमिति शतं दीर्घमायुः ४९ मातेराधांसि मातारूधयो वसोस्नक्॥
मा त्वते धमानि मा त्वते कदाचन स्तरिषुः सर्वाणि पदान्युपमानाय मनुष्या हि तोयमादित्योपमान्माथैतदनुप्रवद
त्यथैतं महांतमात्मानमेषर्गणः प्रवदति वैश्वकर्मणे देवानां नु वयं जाना नासदासीन्नोसदासीत्तदानीमिति च
सेषात्मजिज्ञासा सेषा सर्वभूतजिज्ञासा ब्रह्मणः सार्ष्टितं सरूपतां सलोकतां गमयति य एवं वेद नमो ब्रह्मणे नमो
महते भूताय नमः पास्कराय नमो यास्काय ब्रह्मशुक्लमसीय ब्रह्मशुक्लमसीय ५० ॥ अथेमा पद्यावीयुः
दंबोधिर्हिसोतोः स्मण्येवतरात्मन वाति स्थंगास्व र्पतस्थतादिवाग्दो अक्षर आदित्य इत्यक्षरं नक्षरति हृदातेषु
व्याख्यातं दैवतमग्निरस्मिजन्मना पश्यंगोपामाकाशगुणा तं परिवर्तमानं सयद्यनुरुध्यते ष्टीत्तरमध्यपेहिंसा

नि·रु·भ
१२

॥इतियास्कैयनैरुक्तंसमाप्तं॥

629

शिव
१२